International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 182-185
© 2026 IJMH
www.themultijournal.com
Received: 30-05-2026
Accepted: 24-06-2026
Publish : 25-06-2026

**ज्योतिरञ्जननन्दः**
शोधछात्रः,
ज्योतिष एवं वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

**मार्गदर्शकः –**
**डॉ चित्तरञ्जननायकः**
सहायकाचार्यः,
ज्योतिष एवं वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

**Correspondence:**
**ज्योतिरञ्जननन्दः**
शोधछात्रः,
ज्योतिष एवं वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

# श्रीहस्तसञ्जीवनसिद्धज्ञाने पितृमातृरेखादिज्ञानम्

**ज्योतिरञ्जननन्दः**

**शोधपत्रसारः-**

"ज्योतिषशास्त्रमनेकभेदविषयं" सत्यमस्तीदं वराहमिहिरस्य वचनम् । ज्योतिषशास्त्रे फलकथनस्य बहवः प्रकाराः सन्ति । तत्र प्रमुखाः सन्ति जातकशास्त्रम्, ताजिकशास्त्रम्, प्रश्नशास्त्रम्, स्वरशास्त्रम्, शकुनशास्त्रम्, अङ्कज्यौतिषम्, मुहूर्त्तम्, सामुद्रिकशास्त्रम्, रमलज्यौतिषम्, केरलीयम् इत्यादयः । एतासु शाखासु प्रत्येकशाखया जनस्य शुभाशुभफलकथनं भूतभविष्यफलकथनञ्च क्रियते । सामुद्रिकशास्त्रस्य वर्णनं तु दैवज्ञलक्षणवर्णनसन्दर्भे एव आरब्धः वराहमिहिरेण । अत्र आचार्यवराहमिहिरेण विहितं यत् जातकस्य गुणाः दोषाश्च तस्य शरीराकारानुवर्तिनः भवन्ति । यतो हि जातकस्य गुणदोषाणां चिन्तनं, शरीराकारवर्णादीनामपि चिन्तनं जन्मकुण्डल्याः लग्नस्थानात् क्रियते । अतः यादृशं लग्नं भवति तथैव स्वरूपं, शरीराकारः, चरित्रं, गुणदोषाश्च भवन्ति। अतः शरीरलक्षणानि दृष्ट्वा जातकस्य गुणदोषाणां चरित्रस्वभावादीनां च ज्ञानं कर्तुं शक्यते । एतदेव सामुद्रिकशास्त्रं मूलमस्ति । अनया विद्यया अपि महर्षयः फलादेशं कुर्वन्ति स्म । सामुद्रिकशास्त्रस्य विषयाः पुराणेषु बहुत्र प्राप्यन्ते । पुराणेषु मनुष्याणां हस्तपादयोः हलपदम् पुष्करिणी-हय-गजादिभिः फलकथनं दृश्यते । वस्तुतः मनुष्याणां हस्तपादयोः हयगजरथहलवृषभादीनां साक्षादाकृतिः न दृश्यते, परन्तु एतेषां विशेषचिह्नानि नूनं भवन्त्येव। अतः पुराणेभ्यः एतादृशानि चिह्नानि पृथक्तया विलिख्य सामुद्रिकशास्त्रं प्रणीतमस्ति । सामुद्रिकशास्त्रे मनुष्यशरीरे हयगज- शंखचक्रगदापद्महलादीनां चिह्नानि, हस्तरेखाः, ललाटरेखाः, नखशिखा-केशभ्रूभङ्ग-तिललांछनचिह्नानि च सूक्ष्मतया विलोक्य एव फलं विनिर्दिश्यते। अस्यां विद्यायां नृनारयोः सूक्ष्मतया अध्ययनं कर्तव्यं भवति । बृहत्संहिताग्रन्थे तु पञ्चमहापुरुषाणां लक्षणानि अपि सामुद्रिकशास्त्रधारेणैव विहितानि सन्ति ।

तत्रादौ किं नाम सामुद्रिकशास्त्रमिति जिज्ञासायां समुद्रस्येदं सामुद्रिकं तत् सम्बन्धिनं शास्त्रं सामुद्रिकशास्त्रमिति परिभाषा । अनया परिभाषया अनेन विग्रहेण वा द्वौ अर्थावत्र समुत्पद्येते। प्रथमस्तु 'समुद्रादुत्पन्नम्' अर्थात् समुद्रमन्थनसमये बहूनि तत्त्वानि, पदार्थाः, रत्नानि समुत्पन्नानि तदेव शास्त्रमिदमपि समुत्पन्नं स्यात्, अतएव सामुद्रिकम्। अपरोऽर्थः यः स्वीक्रियते सः वर्तते समुद्रपारात् आगतं स्यात्, अतः सामुद्रिकम् ।

सामुद्रिकशास्त्रे शरीरचिह्नलक्षणरेखाभिः फलं कथ्यते। अतएव विद्वांसो वदन्ति यत् "हस्तः समुद्रः" तत्र "रेखाः नद्यः" तथा "बङ्गुलीमूलेषु उत्थितप्रदेशाः पर्वताः" सन्ति । विदुद्यां एतादृगपरिभाषया सामुद्रिकशास्त्रस्य मुख्यविषयवस्तु हस्तदर्शनमेव प्रतिभाति । बहवो एवमपि ब्रुवते यत् "ललाटलिखिता रेखा परिभाष्टुं न शक्यते", अतोऽत्रापि ललाटरेखाणां निषेधत्वात् हस्तरेखा एव सामुद्रिकशास्त्रे विशेषेण गृह्यन्ते । सामुद्रिकशास्त्रस्य समुपलब्धग्रन्थेषु वा संहिताग्रन्थेषु वर्णितसामुद्रिकविषयेषु सम्पूर्णस्यापि शरीरस्य तिलमस्सालांछनादिचिह्नानां फलं लिखितमस्ति, परन्तु सम्पूर्णशरीरस्याध्ययनं मर्यादाकारणात् कर्तुं न शक्यते। अतएव कालान्तरेण सामुद्रिकशास्त्रे विशेषेण हस्तरेखा विलोक्यैव फलकथनं प्रसिद्धमभवत्। हस्तरेखाभिः फलकथनसंबंधिताः स्वतन्त्रग्रन्थाः अपि रचिताः । वैदेशिकैरपि शास्त्रमिदं पठितम् । अनन्तरकाले तु एवमपि उक्तं यत् यस्मिन् शास्त्रे हस्तरेखाभिः फलं कथ्यते तत् शास्त्रं सामुद्रिकमिति ।

सामुद्रिकशास्त्रस्य अपरनाम अङ्गविद्या अपि वर्तते । इति हस्तसञ्जीवनग्रन्थे एवोक्तम् -

**अङ्गविद्या निमितानामष्टानामपि गीयते ।**
**मुख्या शुभाशुभज्ञाने नारदादिनिवेदिता ।।**[1]

नारदगर्गपराशरादिर्निवेदिता शुभाशुभफलकथने अष्टनिमित्तानां मध्ये अङ्गविद्या प्रधाना एव कथ्यते । अष्टनिमित्तानि यथा – अङ्गं, स्वप्नः ,स्वरः, भौमं ,व्यञ्जनः लक्षणं , दण्डत्पात्तः ,अंतरिक्षं, च । तद्यथा-

**अङ्गस्वप्नस्वरश्चैवभौमं व्यञ्जनः लक्षणे।**
**दण्डत्पात्ता अंतरिक्षं च निमित्तं स्मृतमष्टधा ।।**[2]

श्रीहस्तसञ्जीवनसिद्धज्ञानपाण्डुलिप्या मातृरेखा-पितृरेखा-उर्ध्वरेखा-धर्मरेखा-भ्रातृभगिनीरेखा-भाग्यरेखा-मृत्युरेखा-वाहनरेखा-धर्मरेखा-स्त्रीरेखा-धनभोगरेखा-मित्रशत्रुरेखा-यात्रारेखा-तिलफलं इत्यादि अन्येषु विषयेषु अपि सम्यक्वर्णना वर्तते ।

मणिबन्धात् या रेखा बृहस्पतिक्षेत्रस्योधभागं गच्छति सा रेखा पितृरेखामित्युच्यते । पितृरेखायाः नामान्तराणि यथा - पितृरेखा, गोत्ररेखा , बलरेखा, मूलरेखा, वंशरेखा, धर्मरेखा, मनोरेखा, वृत्ति-रेखा च । यद्यथा-

**पिता गोत्रं बलं मूलं वंशोधर्ममनोवृति ।**[3]

हस्ते सङ्गमाक्षयतीर्थयोः विषये कथ्यते यथा-

**पितृरेखा भवेद्गङ्गा मातृरेखा सरस्वती ।**
**आयुरेखात्र यमुना तत्सङ्गतीर्थमक्ष्ययम् ।।**[4]

हस्ते पितृरेखा गङ्गा , मातृरेखा सरस्वती ,आयुरेखा यमुना इति पवित्रनदीस्वरुपा भवन्ति। मात्र ताः यत्र मिलन्ति तत् सङ्ग-मतीर्थस्थानः अक्षयपुण्यप्रदः इत्युच्यते। यथा प्रयागराजे त्रिवेणि-सङ्गमः । अतः अङ्गुष्ठतर्जनीमूलयोर्मध्यस्थानं त्रीवेणी-त्युच्यते ।

**हस्तरेखा त्रयं चैतत् विश्वत्रयमुदाहृतम् ।**
**पितृरेखोर्द्धलोकः स्यान्मातृरेखा च मानवी ।।**
**पातालमायुरेखास्यात् एता दक्षिणहस्तगाः ।**[5]

त्रिलोकेषु त्रिरेखाः अधिपाः भवन्ति । ऊर्ध्वलोकस्य अधिपः पितृरेखा, भूलोकस्य अधिपः मातृरेखा , पाताललोकस्य अधिपः आयुरेखा च इति भवन्ति ।

**पितृरेखाबाल्यवयः तारुण्यं मातृरेखिकाः ।**
**वार्द्धकामायुरेखायां वायु पित्तं कफस्तथा ।।**
**चरस्यिरद्विस्वभावापुंस्त्रीनपुंसकाभिधाः ।**
**नभस्थलांबु चरिण्यं सत्वं रजस्तमः क्रमात् ।।**[6]

पितृरेखा वाल्यवस्थायाः प्रतीकः , मातृरेखा यौवनावस्थायाः प्रतीकः तथा आयुरेखा वृद्धावस्थायाः प्रतीकः इति मन्यन्ते । वात-पित्त-कफ इति त्रिदोषाणां, चर-स्थिर-द्विस्वभावः इति त्रिस्वरुपाणां, पुरुष-स्त्री-नपुंसक इति त्रिलिङ्गानां , आकाश-स्थल-जल इति चरसंज्ञानां , सत्व-रज-तम इति त्रिगुणसंज्ञानां पितृ-मातृ-आयुरेखा क्रमेण अधिपाः भवन्ति ।

**पितृरेखायाः फलं बहुग्रन्थेषु भिन्नरुपेण उपलभ्यते । यथा-**

***श्रीहस्तसञ्जीवनसिद्धज्ञानस्य मते पितृरेखा –***

**पितृरेखाङ्गुष्ठरेखान्तरे या उर्ध्वरेखिकाः ।**
**तत्सङ्ख्यादारभोगः स्याद्वेधे ल्केशश्च तद्भयः ।।**[7]

पितृरेखाङ्गुष्ठयोरन्तरे अर्थात् शुक्रक्षेत्रे याः ऊर्ध्ववक्ररेखाः स्यात् तत्सङ्ख्यायुक्तानां स्त्रीणां भोगः करोति । अत्र या रेखा स्पष्टं अखण्डितं पूर्णं वा भवति तत्तु सुखकरसम्पर्कं भवति । मात्र यदि रेखा अस्पष्टं खण्डितं अपूर्णं वा स्यात् तर्हि असुखकरसम्पर्कं भवति ।

**गोत्ररेखाथ यस्य स्याद् खण्डा वेधवर्जिता ।**
**गोत्रे समुख्यतां याति सर्वेषामाश्रयः पुमान् ।।**[8]
**यावन्त्यः पल्लवाश्चास्यां मायासम्मुख गामिनः ।**
**तावन्त्यः पितृद्रव्यस्य भवेर्युर्भागहरिणः ।।**[9]
**तावन्त्यः पल्लवा राज्ञोभिमुखास्ते प्रियम्वदाः ।**
**भ्रातरः स्वजनाकोर्य पुंसः साहायकारिणः ।।**[10]

यदि पितृरेखा अविच्छिन्ना अक्षुर्णा च भूत्वा सम्पूर्णं भवति तथा अन्यरेखां न स्पृशति, तर्हि सः व्यक्तिः स्वकुटुम्बे प्रमुखतां प्राप्नोति तथा सर्वेषां सहायकं करोति । पितृरेखातः यावत्यः पल्लवस्वरुपाः (लघु अङ्कुररूपाः) रेखाः अपसारिताः सन्ति, तावत्यः सङ्ख्यायुक्ताः जनाः पैतृकसम्पत्तिषु भागिनः भवन्ति । यावत्यः पल्लवाः अङ्गुष्ठं प्रति अभिमुखाः सन्ति तत्सङ्ख्यकयाजनाः प्रियम्वदाः,भ्रातरः,स्व-जनाः,कार्येसहायकाश्च भवन्ति ।

**तर्जन्यधास्त्रिवेण्यन्तर्यदा रेखाद्वयं भवेत् ।**
**आद्यादैर्घ्यं पितृमृत्युः प्रथमं मातुन्यथा ।।**[11]
**पितृरेखा मातृरेखा मिलने ग्रहबन्धकः ।**
**कलत्रमित्रसम्बन्धो वामे तन्सङ्गमे करे ।।**[12]

तर्जनीमूलतः अङ्गुष्ठमूलपर्यन्तं क्षेत्रं त्रिवेणी इति कथ्यते । यदि तत्र द्वे रेखे(पितृमातृरेखा) स्तः,इतोऽपि प्रथमा दीर्घा चेत् प्रथमे पितृमरणं यदि द्वितीया दीर्घा तर्हि प्रथमे मातृमरणं भवति। यदि द्वे रेखे (पितृमातृरेखा) एकत्रमेव मिलन्ति तर्हि परिवारस्य पोषणं सम्यक्तया कर्तुं शक्नोति । यदि एते (पितृमातृरेखा) वामहस्ते मिलन्ति तर्हि स्त्रियः प्रति प्रेमः अधिकं भवति ।

***सचित्रसामुद्रिकरहस्यमते पितृमातृरेखा-***

**विलसतः पितरौ पृथगौ यदा भवति सङ्करवर्णनरस्तदा ।**
**कुटिलदीर्घलघू यदि वा छिते जनकयोः सुखमेति न मानवः ॥**[13]

मातृपितृरेखयोः यदि युतिः न भवति तर्हि व्यक्तिः वर्णसङ्करः भवति । यदि एते रेखे कुटिले, ह्रस्व-दीर्घे , खण्डिता वा भवन्ति तर्हि व्यक्तिः मातृपितृसुखं न प्राप्नोति ।

**पित्रोर्या छिन्नरेखा स्यात्तयोरेकस्य निश्चयः ।**
**द्वयोश्छिन्ने द्वयोर्नाशो वक्तव्यः सर्वदा बुधैः ॥**
**कस्यापि लघुदीर्घा चेत् पित्रोरेकस्य संस्थितिः ।**
**सुशोभना सुमार्गा चेत् पितरौ स्तौ न संशयः ॥**
**यस्मिन् वर्षे हि या छिन्ना कष्टं स्यात्तस्य तत्र वै ॥**[14]

मातृपितृरेखासु या रेखा भग्ना सा नश्यति, यदि उभौ भग्नौ तदा उभौ पितरौ विनश्यति इति वक्तव्यम् । यदि एतासु कोऽपि कनिष्ठः वा ज्येष्ठःस्यात् तर्हि एकस्य स्थितिः एव ज्ञातव्यम् । यदि उभयोः सुन्दरं सरलं च स्यात् तर्हि उभयस्य स्थितिरेव वक्तव्या । यस्मिन् वर्षप्रमाणे रेखा भग्ना तत्सम्बत्सरे दुःखं वक्तव्यम् ।

**पित्रा युक्ता गभीरा शुचितमजननी स्याद्धि शाखाविशिष्टा**
**साहित्ये गूढवेत्ता त्वभिनवरचना सुष्ठुलेखप्रवीणः ।**
**छिन्ना क्षुद्राभिरेखा प्रचलति जननी पाणि-मूल-प्रदेशे**
**आत्मानं घातयेत्सो निवसति विमले पाणियुग्मे हि यस्य ॥**[15]

यदि मातृपितृरेखा संयुक्ता ,शुद्धा, गभीरा, स्वच्छा, शाखायुक्ता च भवति तर्हि व्यक्तिः साहित्यस्य गूढविषयज्ञः , अभिनवरचनाकारः, सुलेखकः च भवति । यदि एते रेखे लघुरेखाभिः छित्त्वा मणि-बन्धयावत् विस्तृता भवति तर्हि व्यक्तिः आत्महत्या करोति ।

**चन्द्रदत्तपन्तेन चन्द्र-हस्त-विज्ञाने उक्तं जीवनरेखा –**

एषा रेखा संस्कृतसामुद्रिकशास्त्रे पितृरेखा इति उच्यते तथा च हिन्दी-देवनागरीभाषायां आयुरेखा इति नामाङ्किता अस्ति।

इतोऽपि आङ्ग्लभाषायां Vital अथवा Life Line इति उच्यते । जीवनरेखा तर्जनी-अङ्गुष्ठयोः मध्यस्थानात् शुक्रक्षेत्रं गत्वा अग्रे मणिबन्धं प्रति गच्छति । किन्तु तस्याः प्रसारः, दीर्घता, विस्तारः च सर्वेषु हस्तेषु समानः न दृश्यते, अतः आयुप्रमाणानुसारं तस्य दीर्घता सर्वेषु हस्तेषु न्यूनाधिकरीत्या भिन्ना दृश्यते । केषुचित् हस्तेषु एषा रेखा अर्धवृत्ताकारः भवति, केषुचित् हस्तेषु न्यूनाधिकरित्या अग्रे गच्छति, अतः तस्याः प्रसारक्षेत्रं शुक्रक्षेत्रमपि लघु कारयति । तानि सर्वाणि मनसि स्थापित्वा उत्तमहस्तरेखाविशेषज्ञः कस्यचित् व्यक्तोः आयुप्रमाणं ,रोगानाम् उत्पत्तिसमयं च निर्धारयितुं तथा तेषां वर्षप्रमाणपि वक्तुं शक्नोति ।

कस्यचित् पुरुषस्य हस्तद्वयं तस्य जीवनस्य विश्लेषणार्थं विस्तृतइतिहासः इव भवति । यस्मिन् दक्षिणहस्तः वर्तमान तथा भविष्यवर्णनं कर्तुं समर्थः भवति तथा च वामहस्तः गतस्य विषये कथयति । किं वक्तव्यं यत् यदि कस्यचित् व्यक्तेः दक्षिणहस्तस्य जीवनरेखा एकस्मिन् स्थाने भग्नं भवति, प्रेक्षकस्य हृदये मृत्युभयं जनयति, परन्तु इतोऽपि अग्रे सा रेखा तस्य जीवनं दर्शयति, तर्हि एतादृशि संदिग्धस्थितौ वामहस्तं दृष्ट्वा शङ्कां विमृश्य किमपि वक्तव्यम् । यदि वामहस्तस्य जीवनरेखा अपि एकस्मिन् समये भग्नं भवति तर्हि दक्षिणहस्तस्य जीवनरेखायाः समर्थनं निश्चयेन करोति । तादृशे सति तस्य पुरुषस्य मृत्युः प्रायः अवश्यम्भावी भविष्यति इति वक्तव्यम् । तथा च यदि वामहस्ते रेखा स्वच्छः, स्पष्टः च भवति तर्हि दक्षिणहस्ते जीवनरेखायाः विरुद्धा भवति। सम्भवति यत् एतादृशे सति सः व्यक्तिः कस्यचित् दीर्घकालीनस्य गम्भीरस्य वा रोगात् स्वस्थः भूत्वा दीर्घायुषः जीवितुं शक्नोति । अस्य अर्थः अस्ति यत् तस्य मृत्युभयं कथञ्चित् नास्ति । एवं प्रकारेण रेखाणां परिशीलनं करणीयम् ।[16]

**अभिनवसामुद्रविज्ञाने पितृरेखा –**

**पितुः सुरेखोपरिगं विशुद्धं चिह्न गुणाख्येन युतं यदा स्यात् ।**
**कार्योन्नतं तं पुरुषं करोति सन्नष्टवित्तं विगतासनं च ॥[17]**

यदि पितृरेखायाः उपरि विशुद्धगुणात्मकचिह्नानि विद्यन्ते तर्हि तं कार्यसफलः ,धननाशः, पूर्वपदाधिकारी च क्रीयते ।

**पित्रोः सुरेखे नहि सङ्गते चेद्रेखाद्वयेनापि युते च खण्डिते ।**
**कर्तव्यकार्ये सरलं सुबोधं घत्तो जनं तं विगतारिवृन्दम् ॥[18]**

यदि मातृपितृरेखा परस्परं न युज्यते तथा भिन्ना रेखाभ्यां संयुक्ता खण्डिता च भवति तर्हि, मनुष्यः सरलं, सुबोधं, शत्रुहीनं च भवति ।

**पितुः सुरेखोपरिगं यदा स्याद्रेखाद्वयं रेखयुगेन भिन्नम् ।**
**भार्यासमूहेन युतं करोति भार्याविहीनं बहुखण्डितं चेत् ॥[19]**

यदि पितृरेखायाः उपरि रेखाद्वयं रेखाद्वयेन भग्नं भवति तर्हि मनुष्यः भार्यासु युक्तः भवति । उपर्युक्तरेखाद्वयं बहुरेखाभिः भग्नं चेत् तदा सः भार्यारहितं भवति ।

**श्रीहस्तसञ्जीवनसिद्धज्ञानस्य मते मातृरेखा –**

चन्द्रक्षेत्रात् या रेखा बृहस्पतिक्षेत्रस्याधोभागयावत् गच्छति सा रेखा मातृरेखामित्युच्यते । मातृरेखायाः नामान्तराणि यथा- मातृरेखा, धनरेखा , सुखरेखा, कोशरेखा, साहसरेखा, पालिकारेखा, रतिरेखा च भवति । यद्यथा-

**माताधनं सुखं कोशः साहसं पालिका रतिः ।[20]**

मातृरेखाफलकथनम् -

**अस्ताचल द्रव्यरेखा रक्तं स्वडा धनप्रदा ।**
**तस्यां तेचेत्यल्लवा जीवरेखा मुख अपत्यदा ।।[21]**
**अङ्गुष्ठ सम्मुखो ये ते तावद्वारं धनार्जनम् ।**
**तस्या छेदे राजदंदुश्चौराद्धानिस्तु वेधतः ।।[22]**

यदि मातृरेखा करभस्थानात् अखण्डिता रक्तवर्णा च भूत्वा तर्जनीअङ्गुष्ठयोर्मध्ये (पितृतीर्थः) गच्छति तर्हि धनं वर्धते । एषा रेखा धनरेखाऽपि ज्ञायते । यदि अस्यां रेखायां पल्लवाश्चेत् सन्तानसुखं जायते । यदि एते पल्लवाः जीवनरेखां प्रति गच्छति तर्हि उपर्युक्तानि परिणामानि मिलति तथा यदि अङ्गुष्ठं प्रति गच्छति तर्हि धनप्राप्तिः भवति । यदि एतेषु पल्लवेषु छिद्रः भवति तर्हि राजदण्डः तथा अन्यरेखया कर्तिता तर्हि चौरभयं भवति ।

**चन्द्रदत्तपन्तेन चन्द्र-हस्त-विज्ञाने उक्तं मस्तिष्करेखा अथवा मातृरेखा-**

एषा रेखा संस्कृतसामद्रिकशास्त्रे मातृरेखा इति उच्यते तथा हिन्द्यां मस्तकरेखा , बुद्धिरेखा च इति नाम्ना प्रसिद्धा अस्ति, या आङ्ग्लभाषायां Cerebral, Charity, Scholorship अथवा Head line इति अपि कथ्यते । तर्जनी-अङ्गुष्ठयोः मध्यभागः एव अस्याः उत्पत्तिस्थानं स्मृतम् । अनेकहस्तेषु मस्तकरेखा वा जीवनरेखा एकस्मात् स्थानात् उत्पद्यन्ते परन्तु बहुहस्तेषु अस्याः उत्पत्तिः भिन्ना भवति । एषा रेखा हस्तं द्विधा विभज्य राहुइन्द्रप्रदेशयोः पृथक्करणं कृत्वा बुधग्रहस्य अधः प्रजापति प्रदेशं प्राप्नोति । एषा रेखा सर्वेषु हस्तेषु समानरूपेण गच्छति इति कदापि न ज्ञेयम्, परन्तु मस्तिष्कस्य प्रगतेः, क्षयस्य, दुर्बलतायाः च अनुसारं भिन्न-भिन्न-हस्तेषु भिन्न-भिन्न-प्रकारेण स्थिति दृश्यते । यस्याः अवसानः प्रजापतिवरुणचन्द्रक्षेत्रेषु च अपि दृश्यन्ते ।[23]

**भारतीयज्यौतिषविज्ञानमते मातृरेखाज्ञानम् –**

यदा चन्द्रालयात् गत्वा एका गभीरा रेखा पितृरेखायाः समीपं प्राप्नोति तदा तस्याः नाम शिर्षरेखा इति, अनेके विद्वांसः मातृरेखा इत्यपि कथयन्ति ।[24]

**अभिनवसामुद्रविज्ञाने मातृरेखा –**

**मातुः सुरेखा यदि खण्डिता सा चापानुरूपा समियात्सुभोगाम् ।**
**मानापमानेन युतो जनः स्यादात्मापघाती कथितः सुधीभिः ॥[25]**

यस्य मातृरेखा भग्ना धनुस्वरुपा च भूत्वा भोगरेखां गच्छति तर्हि मनुष्यः मानापमानेन सह आत्महत्या करोति ।

**मातुः सुरेखा यदि मध्यभिन्ना वियुक्तरूपा खलु पित्रेखा ।**
**तदन्तरे भाति त्रिकोणचिह्न सखण्डितं चेज्जनकस्य हन्ता ॥[26]**

यस्य मातृरेखा मध्ये भग्ना स्यात् तथा पितृरेखा तस्मात् पृथक् निर्गत्य द्वयोः मध्ये यदि सखण्डितत्रिकोणचिह्नं परिदृश्यति तर्हि तादृशः व्यक्तिः पितृहन्ता भवति ।

**मातुः सुरेखा यदि नीचभागे सङ्कर्तिता पुच्छयुता भवेत्तु ।**
**धर्मेण हीनं मनुजं करोति पापे प्रवृत्तं पुरुषाधमं तम् ॥[27]**

यदि मातृरेखा अधोभागे भग्ना पुच्छयुक्ता च भवति तर्हि मनुष्यः अधर्मी, पापी तथा पुरुषेषु अधमः भवति ।

**उपसंहारः-**

ज्योतिषशास्त्रे जातकस्य फलकथनपरम्परायां नैके विधयः प्रतिपादिताः । तेषु शरीरलक्षणचिह्नानां दर्शनमपि अन्यतमं वर्तते।

तस्यैव संज्ञा सामुद्रिकशास्त्रमभवत्। जनानां शारीरिकलक्षणानि, शरीरस्य चिह्नानि, करतलान्तर्गताः रेखाः शुभाशुभफलानि सूचयन्ति । अस्य शास्त्रस्य आविर्भावस्तु भारते अत्यन्तप्राचीन-कालादेव अभवत् । पुराणेषु अस्य सर्वाधिकवर्णनं प्राप्यते। यत्र कुत्रपि राज्ञः महापुरुषस्य वा वर्णनं क्रियते । तत्र तेषां शारिरीकलक्षणानि प्रदर्शितानि एव सन्ति । यथा भगवतः श्रीरामस्य ध्यानवर्णने विहितम् - "आजानुभुजशरचापधर" अर्थात् श्रीरामस्य बाहू जानुपर्यन्तं दीर्घौ आस्ताम् ।

सामुद्रिकशास्त्रस्य उत्पत्तेः कारणं पिण्डब्रह्माण्डयोः एकता एव वर्तते। प्राचीनकाले जन्मकुण्डलीनिर्माणं कष्टसाध्यं कार्यमासीत् । तथैव प्रश्नकुण्डलीनिर्माणार्थमपि लग्नग्रहस्पष्टीकरणानाम् आवश्यकता आसीत् । अतः प्रत्येकस्य जनस्य भविष्यफलकथनं सम्भवं नासीत् । अतएव आवश्यकताकारणात् सामुद्रिकशास्त्रस्य आविर्भावः अभवत् । अत्र सामुद्रिकशास्त्रस्य विविधविषयाः वर्णिताः। यतोहि जगति जनानां मुखाकृतिः, हस्तरेखाः, अङ्गुष्ठरेखाः समानाः न भवन्ति । अतः प्रत्येकस्य जनस्य फलकथनमपि विलक्षणमेव भवति । परन्तु जातकशास्त्रे एककाले समुत्पन्नानां जनानां जन्मकुण्डल्यस्तु समाना एव भवन्ति । अतः सामुद्रिकशास्त्रं जनविशेषस्य पृथक् पृथक् रूपेण सूक्ष्मफलं करोति ।

संहितास्कन्धान्तर्गतं आचार्यवराहमिहिरेण सामुद्रिकशास्त्रं ज्याति-षशास्त्रस्य परिगणितम्। इदं शास्त्रं समुद्रऋषिणा प्रवर्तितम् इति वर्णनं प्राप्यते हस्तसंजीवनग्रन्थे । सामुद्रिकशास्त्रे मुख्यतया शारीरिकचिह्नानां, हस्तान्तर्गतरेखाणां च वर्णनं प्राप्यते। द्वयोः पाठेऽस्मिन् वर्णनं कृतमस्मि। उदाहरणानि च प्रदत्तानि ।

**सहायकग्रन्थसूची**


१. हस्तसञ्जीवनसिद्धज्ञानम् (पाण्डुलिपिः) .

२ चन्द्र-हस्त-विज्ञाने, चन्द्रदत्तपन्तेन, मोतीलाल बनारसीदास प्रकाशनम्,दिल्ली,२००७

३. बृहत्संहिता , डॉ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी , २००९ .

४. बृहज्जौतिषसारम् , ज्यौतिषाचार्य पं रूपनारायणशर्मा, सावित्री ठाकुर प्रकाशन .

५.सचित्रसामुद्रिकरहस्यम् , पं. कालिका प्रसादः , ज्योतिषप्रकाशनम् , चौखम्बा , वारणासी ।

६.भारतीयज्यौतिषविज्ञानम्, डाँ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी .

७.ज्योतिर्विज्ञानशब्दकोषः , डाँ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी .

८.अमरकोशः , अमरः , चौखम्बा सुरभारती प्रकाशनम् , २००६ .

९.भरतकोशः , मानवल्लि रामकृष्णकविः , तितिदे प्रकाशनम् , १९९९.

१०अभिनव सामुद्रविज्ञानम्, डॉ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी


**पाद टिप्पणी -**

1. ह.सं.सिद्धज्ञान- पृ.सं-१,श्लो.सं-४
2. ह.सं.सिद्धज्ञान- पृ.सं-१,श्लो.सं-५
3. ह.सं.सिद्धज्ञान- पृ.सं-६,श्लो.सं-१२
4. ह.सं.सिद्धज्ञान- पृ.सं-३,श्लो.सं-५
5. ह.सं.सिद्धज्ञान- पृ.सं-३६,श्लो.सं-३९
6. ह.सं.सिद्धज्ञान- पृ.सं-३७,श्लो.सं-४२,४३
7. ह.सं.सिद्धज्ञान- पृ.सं-४०,श्लो.सं-८७
8. ह.सं.सिद्धज्ञान- पृ.सं-४२,श्लो.सं-११
9. ह.सं.सिद्धज्ञान- पृ.सं-४२,श्लो.सं-१२
10. ह.सं.सिद्धज्ञान- पृ.सं-४२,श्लो.सं-१३
11. ह.सं.सिद्धज्ञान- पृ.सं-४०,श्लो.सं-९४
12. ह.सं.सिद्धज्ञान- पृ.सं-४०,श्लो.सं-९५
13. स.सा.रहस्य - पृ.सं-१४०,श्लो.सं-१
14. स.सा.रहस्य - पृ.सं-१५०,श्लो.सं-२५,२६,२७
15. स.सा.रहस्य - पृ.सं-१३४,श्लो.सं-४
16. चं.ह.वि- पृ.सं-३१८,३३७
17. अ.सा.वि -पृ.सं-१७९, श्लो.सं.-१६८
18. अ.सा.वि -पृ.सं-१७९, श्लो.सं.-१६९
19. अ.सा.वि -पृ.सं-१८०, श्लो.सं.-१७७
20. ह.सं.सिद्धज्ञान- पृ.सं-६, श्लो.सं-१३
21. ह.सं.सिद्धज्ञान- पृ.सं-४१,श्लो.सं-९
22. ह.सं.सिद्धज्ञान- पृ.सं-४१,श्लो.सं-१०
23. चं.ह.वि- पृ.सं-३१८,३३८
24. भा.ज्यौ.वि- पृ.सं-८०७
25. अ.सा.वि -पृ.सं-१७७, श्लो.सं.-१५९
26. अ.सा.वि -पृ.सं-१७८, श्लो.सं.-१६५
27. अ.सा.वि -पृ.सं-१७९, श्लो.सं.-१७३